"धिगस्तु नष्टः खलु भारतानां
धर्म्मस्तथा क्षत्रविदाञ्च वृत्तम्।
यत्र व्यतीतां कुरुधर्म्मवेलां
प्रेक्षन्ति सर्व्वे कुरवः सभायाम्॥")

समुद्रकूलम्। (यथा, रघुः। १। ३०।
"स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव॥")
समुद्रजलविकारः। (यथा, रघुः। १२। ३६।
"संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः॥")
अक्लिष्टमरणम्। रागः। ईश्वरस्य भोजनम्। इति मेदिनी॥ अत्र पवर्गीयवकारादौ लिखितः। रागस्थाने रोगः। वाक्। बुधस्त्री। इति विश्वः॥ दन्तमांसम्। इति हारावली॥

वेलाकूलं, क्ली, (वेला एव कूलं यस्य।) ताम्रलिप्तदेशः। यथा,—
"वेलाकूलं ताम्रलिप्तं ताम्रलिप्ती तमालिका॥"
इति त्रिकाण्डशेषः॥
(समुद्रकूलम्। यथा, भागवते। १०।६७।५।
"क्वचित् समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम्।
देशान् नागायुतप्राणो वेलाकूले न्यमज्जयत्॥")

वेलिभुक्प्रियः, पुं, सौरभयुक्ताम्रः। यथा,—
"——————रसाले त्वतिसौरभे।
महाकाले च किम्पाक उर्व्वटो वेलिभुक्प्रियः॥"
इति शब्दरत्नावली॥
(बलिभुक्प्रिय इत्येव पाठः साधुः॥)

वेल्ल, ऋ चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अविवेल्लत्। चालः सञ्चलनम्। उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्य्यताम्। गतावित्येके। इति दुर्गादासः॥

वेल्लं, क्ली पुं, (वेल्लतीति। वेल्ल चलने + पचाद्यच्।) विडङ्गः। इत्यमरः॥ (भावे घञ्।) गमने, पुं। इति वेल्लधात्वर्थदर्शनात्॥

वेल्लजं, क्ली, (वेल्लवत् जायते इति। जन + डः।) मरिचम्। इत्यमरः॥

वेल्लनं, क्ली, (वेल्ल + ल्युट्।) भूमौ अश्वस्य लुण्ठनम्। तत्पर्य्यायः। लुण्ठनम् २। इति त्रिकाण्डशेषः॥ (सञ्चलनम्। यथा, राजतरङ्गिण्याम्। ८। १५६५।
"धत्ता सरित् स्खलदवैर्जलधिप्रवेशे
वेलोर्म्मिवेल्लनवशेन विवर्त्तमाना॥")
रोटिकादिनिर्म्माणार्थस्थूलवर्त्तुलकाष्ठविशेषः। इति भावप्रकाशः॥ वेलन् इति भाषा॥

वेल्लनी, स्त्री, (वेल्लति लुठति अश्वादिरत्रेति। वेल्ल + ल्युट्। ङीप्।) मालादूर्व्वा। इति राजनिर्घण्टः॥

वेल्लन्तरः, पुं, वीरतरुः। यथा, भावप्रकाशे।
"वेल्लन्तरो जगति वीरतरुः प्रसिद्धः
श्वेतासितारुणविलोहितनीलपुष्पः।
स्यात्पातितुल्यकुसुमः शमिसूक्ष्मपत्त्रः
स्यात् कण्टकी च जलदेशज एष वृक्षः॥"
अस्य गुणाः।
"वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफापहः।
मूत्राघाताश्मजिद्ग्राही योनिमूत्रानिलार्त्तिजित्॥"

वेल्लहलः, पुं, केलिनागरः। इति जटाधरः॥

वेल्लिः, स्त्री, (वेल्लति सञ्चलतीति। वेल्ल + इन्।) लता। इति शब्दरत्नावली॥

वेल्लिकाख्या, स्त्री, (वेल्लिका आख्या यस्याः।) वृक्षविशेषः। वेलसुटा इति भाषा। यथा,—
"मरुम्माला वेल्लिकाख्या विल्लपत्त्री ज्वरापहा॥"
इति शब्दचन्द्रिका॥

वेल्लितं, क्ली, (वेल्ल + क्तः।) गमनम्। इति मेदिनी॥

वेल्लितः, त्रि, (वेल्ल + क्तः।) कुटिलः। कम्पितः। इत्यमरः॥

वेवी, ङ च लु ङ कान्तिगतिव्याप्तिक्षेपप्रजनखादने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-कान्तौ अक०-अन्यत्र सक०-सेट्।) ङ, वेविक्तः। च, अवेवयुः। बहुलं ब्रह्मणीति परस्मैपदे अनुस् सिद्धेरियन् उस् गुणश्चामिति गुणः। लु ङ, वेवीते। इति दुर्गादासः॥

वेशः, पुं, (विशन्ति नयनमनांस्यत्रेति। विश् + अधिकरणे घञ्। यद्वा, विशति अङ्गमिति। "पदरुजविशस्पृशो घञ्।" ३।३।१६। इति घञ्।) अलङ्काररचनादिकृतशोभा। तत्पर्य्यायः। आकल्पः २ नेपथ्यम् ३ प्रतिकर्म्म ४ प्रसाधनम् ५। इत्यमरः॥ वेषः ६। इति तट्टीकायां भरतः॥ (यथा, भागवते। १। १७। ५।
"नरदेवोऽसि वेशेन नटवत् कर्म्मणा द्विजः॥"*॥
विशन्ति कामुका यत्रेति। अधिकरणे घञ्।) वेश्यागृहम्। गृहमात्रम्। इति मेदिनी॥ (वस्त्रगृहम्। ताँबु इति भाषा॥ यथा, महाभारते। ५। १५१। ५३।
"शकटापणवेशाश्च यानयुग्यञ्च सर्व्वशः।
*  *  *
तत् संगृह्य ययौ राजा ये चापि परिचारकाः॥")
प्रवेशः। इति विशधात्वर्थदर्शनात्॥ (पण्यस्त्रिया भृतिः। यथा, मनुः। ४। ८४—८५।
"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम्॥
दशसूनासमं चक्रं दशचक्रसमो ध्वजः।
दशध्वजसमो वेशो दशवेशसमो नृपः॥")

वेशकः, पुं, (वेश एव। स्वार्थे कन्।) गृहम्। इति शब्दरत्नावली॥ वेशकारके, त्रि॥

वेशदानः, पुं, सूर्य्यशोभा। इति शब्दचन्द्रिका॥

वेशधारी, [न्] पुं, (वेशं तापसलिङ्गं धरतीति। धृ + णिनिः।) छलतपस्वी। इति शब्दरत्नावली॥ (सङ्करजातिविशेषः। यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १० अध्यायः।
"गङ्गापुत्त्रस्य कन्यायां वीर्य्येण वेशधारिणः।
बभूव वेशधारी च पुत्त्रो युङ्गी प्रकीर्त्तितः॥")
वेशधारके, त्रि॥

वेशन्तः, पुं, (विशन्त्यत्र भेकादय इति। विश + "जॄविशिभ्यां झच्।" उणा० ३। १२६। इति झच्।) क्षुद्रसरोवरः। इत्यमरः॥ अग्निः इत्युणादिकोषः॥

वेशरः, पुं, अश्वतरः। इति त्रिकाण्डशेषः॥

वेशवारः, पुं, वेसवारः। इत्यमरटीकायां रायमुकुटः॥

वेशीजाता, स्त्री, पुत्रदात्रीलता। इति राजनिर्घण्टः॥

वेश्म, [न्] क्ली, (विशन्त्यत्रेति। विश + मनिन्।) गृहम्। इत्यमरः॥ (यथा, मनुः। ३। ७३।
"अदारेण च नातीयात् ग्रामं वा वेश्म वाष्टतम्॥")

वेश्मकलिङ्गः, पुं, (वेश्मनः कलिङ्गः।) चटकः। अस्य मांसगुणौ। सन्निपातनाशित्वम्। अतिशुक्रकारित्वञ्च। इति राजवल्लभः॥

वेश्मकूलः, पुं, (वेश्म गृहं कूलयतीति। कूल + कः।) चचेण्डा। इति राजनिर्घण्टः॥

वेश्मनकुलः, पुं, (वेश्मनो गृहस्य नकुलः।) गन्धमूषिकः। यथा,—
"चिक्कः स्याद्वेश्मनकुलश्छिक्का च बालमूषिका।
गन्धछयी गन्धमूषी गिरिका स्यात्तु सुन्दरी॥"
इति शब्दरत्नावली॥

वेश्मभूः, स्त्री, (वेश्मनो भूः।) गृहकरणयोग्यभूमिः। तत्पर्य्यायः। वास्तुः २। इत्यमरः॥

वेश्यं, क्ली, (वेशे भवम्। वेश + "दिगादिभ्यो यत्।" ४। ३। ५४। इति यत्। यद्वा, वेश्यायै हितम्। वेश्या + यत्।) वेश्यालयः। इति मेदिनी॥ (प्रवेशार्हे, त्रि। यथा, ऋग्वेदे। ४। २६। ३।
"शततमं वेश्यं सर्व्वताता दिवोदासमतिथिग्वं यदावम्॥"
"वेश्यं दिवोदासनाम्ने प्रवेशार्हम्।" इति तद्भाष्ये सायणः॥)

वेश्या, स्त्री, टुकुकाष्ठचः। आकनादि इति भाषा। इति शब्दचन्द्रिका॥ (वेशमर्हति वेशेन दीप्यत्याचरति वेशेन पण्ययोगेन जीवति वा। वेश + यत्।) खनामख्यातनारी। खान्की इति भाषा। तत्पर्य्यायः। वारस्त्री २ गणिका ३ रूपाजीवा ४। इत्यमरः॥ वेष्या ५। इति तट्टीका॥ क्षुद्रा ६ शालभञ्जिका ७। इति जटाधरः॥ झर्झरा ८ मूला ९ वारविलासिनी १० वारवाणिः ११ भण्डहासिनी १२। इति शब्दरत्नावली॥ लञ्जिका १३ बन्धुरा १४ कुम्भा १५ कामरेखा १६ वर्व्वटी १७। इति शब्दमाला॥ साधारणस्त्री १८ पण्याङ्गना १९ पणाङ्गना २० भुजिष्या २१ वारवधूः २२। इति हेमचन्द्रः॥ भोग्या २३ स्मरवीथिका २४। इति राजनिर्घण्टः॥ तस्या लक्षणगमनफलादि यथा,—
"पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता।
तृतीये धर्षणी ज्ञेया चतुर्थे पुंश्चली स्मृता॥